**SET-4**

**Series 7DFEG**

प्रश्न-पत्र कोड
Q.P. Code **52**

रोल नं.
Roll No.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **15** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **18** प्रश्न हैं।
- ***कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में यथा स्थान पर प्रश्न का क्रमांक अवश्य लिखें।***
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा। 10.15 बजे से 10.30 बजे तक परीक्षार्थी केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।
- Please check that this question paper contains **15** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **18** questions.
- **Please write down the Serial Number of the question in the answer-book at the given place before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the candidates will read the question paper only and will not write any answer on the answer-book during this period.

[ ]

# संस्कृतम्
# SANSKRIT

*अवधि : होरात्रयम्*
*निर्धारित समय : 3 घण्टे*
*Time allowed : 3 hours*

*पूर्णाङ्काः : 80*
*अधिकतम अंक : 80*
*Maximum Marks : 80*

***General Instructions :***

*This question paper is divided into **4** (Four) sections.*

*It has total **18** questions.*

- ***Section A** – 1 Question no. 1 to 1*
- ***Section B** – 3 Questions no. 2 to 4*
- ***Section C** – 7 Questions no. 5 to 11*
- ***Section D** – 7 Questions no. 12 to 18*

*Attempt questions as per specific instructions.*

*Write question no. in answer book before attempting it.*

***सामान्य-निर्देशा:***

*अस्मिन् प्रश्नपत्रे **चत्वार:** खण्डा: सन्ति।*

*अस्मिन् प्रश्नपत्रे **अष्टादश (18)** प्रश्ना: सन्ति।*

- ***खण्ड: 'क'** – 1 – प्रश्नसंख्या 1*
- ***खण्ड: 'ख'** – 3 – प्रश्नसंख्या 2 – 4*
- ***खण्ड: 'ग'** – 7 – प्रश्नसंख्या 5 – 11*
- ***खण्ड: 'घ'** – 7 – प्रश्नसंख्या 12 – 18*

*विशिष्टनिर्देशानुसारं प्रश्ना: समाधेया:।*

*उत्तरपुस्तिकायां लेखनात् पूर्वं सर्वप्रथमं प्रश्नसंख्या लेखनीया।*

## खण्ड: 'क' *10 अङ्का:*

## अपठितावबोधनम्

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *10*

परीक्षाया: दिनानि अतिविचित्राणि भवन्ति। यथा-यथा परीक्षाकाल: समीपम् आयाति तथा-तथा छात्राणां हृदयगति: वर्धते। परीक्षा प्रायश: छात्रेभ्य: भयप्रदा एव प्रतीयते। अस्मिन् काले न निद्रैव आयाति न च हृदयं धारयितुं शक्यते, बुभुक्षाऽपि सम्यक् प्रकारेण नानुभूयते। कदाचित् कस्मिंश्चिद् विषये अभ्यासाल्पता प्रतीयते कदाचित् च अन्यस्मिन्। मस्तिष्क: सदैव तनावयुक्त: एव प्रतीयते। न केवलं छात्राणाम् अपितु तेषाम् अभिभावकानामपि दशा एतादृशी एव भवति। परन्तु ये छात्रा: उत्तमा: भवन्ति, वर्षस्य प्रारम्भादेव पठितस्य अभ्यासं कुर्वन्ति, कक्षायां दत्तावधाना: तिष्ठन्ति, सर्वं पाठ्यक्रमं पठित्वा परीक्षात: प्राक् पौन: पुन्येन अभ्यासं पुनरावृत्तिं चापि कुर्वन्ति; ते सर्वथा शान्तमनसा परीक्षाम्बुधिं तरन्ति। अत: सर्वै: एव छात्रै: एवमेव करणीयम्, तदैव ते परीक्षाभयात् मुक्ता: भूत्वा परीक्षासु सदैव सफला: भविष्यन्ति।

(अ) एकपदेन उत्तरत — (केवलं प्रश्नद्वयम्) *2×1=2*

(i) उत्तमा: छात्रा: किं तरन्ति ?

(ii) केभ्य: परीक्षा भयप्रदा प्रतीयते ?

(iii) केषां हृदयगति: वर्धते ?

(आ) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) *2×2=4*

(i) उत्तमा: छात्रा: कदा पठिताभ्यासं कुर्वन्ति ?

(ii) अस्मिन् काले (परीक्षाकाले) किं किं भवति ?

(iii) यदा परीक्षाकाल: समीपम् आयाति तदा किं भवति ?

(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *1*

(ई) यथानिर्देशम् उत्तरत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'उत्तमा:' अस्य पदस्य विशेष्यपदं किमत्र प्रयुक्तम् ?

(A) शान्तमनसा (B) छात्रा:

(C) दशा (D) भवन्ति

(ii) 'निष्फला:' इत्यस्य विलोमपदं किम् ?

(A) सफला: (B) सबला:

(C) कला: (D) मुक्ता:

(iii) 'वर्धते' क्रियाया: कर्तृपदं किं प्रयुक्तम् ?

(A) छात्राणाम् (B) तथा

(C) परीक्षाकाल: (D) हृदयगति:

(iv) 'निकटम्' इत्यर्थे किं पदं प्रयुक्तमस्ति ?

(A) दूरम् (B) भयम्

(C) समीपम् (D) हृदयम्

---

**खण्डः 'ख'** ***15 अङ्काः***

**रचनात्मकं कार्यम्**

**2.** मातरं प्रति लिखितं पत्रम् अधः मञ्जूषाप्रदत्तैः पदैः पूरयित्वा पुनः लिखत। $10\times\frac{1}{2}=5$

लखनऊ-छात्रावासतः

तिथिः ______________

पूज्याः (i) ______________

सादरं प्रणमामि।

अत्र कुशलं तत्रास्तु। इदं विज्ञाय भवती (ii) ____________ भविष्यति यत् गतदिने अन्तर्विद्यालयीय-वाद-विवाद प्रतियोगितायां मया (iii) ____________ स्थानं प्राप्तम्। (iv) ___________ अहमेव प्रथमः आसम्। अस्मिन् वर्षे वार्षिकोत्सवे मया त्रयः (v) ___________ प्राप्स्यन्ते। यतोहि अस्य वर्षस्य नवमकक्षायाः वार्षिकपरीक्षायामपि मया एव प्रथमं स्थानं लब्धम्। वार्षिकोत्सवः आगामि मासस्य प्रथमे (vi) ___________ आयोजयिष्यते। विद्यालयस्य पक्षतः ह्यः एव निमंत्रणपत्रं (vii) _________। अहमपि भवतीं सूचयामि यत् भवती (viii) ____________ सह अवश्यम् आगच्छतु। मम (ix) _________ भविष्यति। पितृचरणयोः मम प्रणामाः।

भवत्याः (x) ____________

प्रदीपः

**मञ्जूषा**

| |
|---|
| उत्साहवर्धनम्, प्रथमम्, प्रेषितम्, आत्मजः, पुरस्काराः, सोमवासरे, पित्रा, गायनप्रतियोगितायाम्, मातृमहोदयाः, अतिप्रसन्ना। |

**3.** अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया **पञ्च** वाक्यानि संस्कृतेन लिखत। *5×1=5*



**मञ्जूषा**

कन्या, क्रीडति, सखीभि:, सह, परित:, वपति, एतत्, वृक्षा:, उपवनस्य, जना:, केचन, भ्रमन्ति, पुष्पाणि, विकसन्ति, अनेकवर्णानि, खनित्रेण, भूमिं, मालाकार:, खनति, पादकन्दुकेन, बालका:, खेलन्ति।

**अथवा**

निम्नलिखितं विषयम् अधिकृत्य मञ्जूषा-प्रदत्तशब्दानां साहाय्येन न्यूनातिन्यूनं **पञ्चभि:** संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत – *5×1=5*

**'अनुशासनम्'**

**मञ्जूषा**

आवश्यकम्, जीवने, नियमपालनं, सर्वत्र, सर्वेभ्य:, विकास:, साफल्यम्, शील:, प्रत्येकम्, उन्नति:, समाजे, सम्मानं, प्राप्नोति।

**4.** अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत – (केवलं वाक्यपञ्चकम्) *5×1=5*

(i) राजा दशरथ के चार पुत्र थे।
King Dasharatha had four sons.

(ii) वे दोनों कल बाज़ार जाएँगी।
Both of them will go to the market tomorrow.

(iii) घोड़े इधर-उधर दौड़ रहे हैं।
Horses are running here and there.

(iv) तुम सब पाठ याद करो।
You all remember the lesson.

(v) हमें प्रतिदिन योग करना चाहिए।
We should do yoga every day.

(vi) आकांक्षा गीता का पाठ कर रही है।
Akanksha is reciting Geeta.

(vii) मैं अपने भाई के साथ पार्क गया था।
I went to the park with my brother.

## खण्डः 'ग' *25 अङ्काः*

## अनुप्रयुक्त-व्याकरणम्

**5.** अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) द्वावेव व्याघ्रचित्रकौ नदीजलं पातुं तत्र आगतौ।

(ii) वयसः + तु न किञ्चिदन्तरम्।

(iii) रामः – धिङ् माम् एवं भूतम्।

(iv) उदये सविता रक्तः रक्तः + च अस्तमये तथा।

(v) दुष्कराण्यपि कर्माणि मतिवैभवशालिनः।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) आरक्षी सुपुष्टदेह: आसीत्।

(A) सुपुष्टा देह: यस्या: सा

(B) सुष्टा देहा यस्य स:

(C) पुष्टम् देहं यस्या: सा

(D) सुपुष्ट: देह: यस्य स:

(ii) वाचि पटु: धैर्यवान् मन्त्री।

(A) वाक्पटु:

(B) वाच्पटु:

(C) वाचापटु:

(D) वाचिपटु:

(iii) पाटलिपुत्रं गङ्गाया: समीपम् अस्ति।

(A) उपगङ्गा

(B) समीपगङ्गा

(C) उपगङ्गम्

(D) गङ्गासमीपम्

(iv) को भेद: पिककाकयो: ?

(A) पिक: च काकौ च

(B) पिक: च काक: च तयो:

(C) पिकौ च काकौ च

(D) पिका: च काका: च तेषाम्

(v) यानानां पङ्क्तय: ह्यनन्ता:।

(A) यानपङ्क्ति:

(B) यानपङ्क्तय:

(C) यानपङ्क्तौ

(D) यानपङ्क्ते:

**7.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) तदेवाहु: महात्मान: समत्वम् इति तथ्यत: ।

(A) सम् + त्व

(B) सम + त्व

(C) सम + त्वम्

(D) सम + तल्

(ii) भवती तु सर्वथा सम्यक् कथयति ।

(A) भवत् + ङीप्

(B) भवत् + ई

(C) भव + ती

(D) भवान् + ई

(iii) आदिश्यताम्, किं कृ + तव्यत् ?

(A) करणीयम्

(B) कृतम्

(C) कृतवान्

(D) कर्तव्यम्

(iv) ऐतिहासिकानि स्थलानि दर्शनीयानि ।

(A) इतिहास + ठक्

(B) ऐतिहासिक + ठक्

(C) इतिहास + मतुप्

(D) इतिहास + इक्

(v) रमणीया हि सृष्टिरेषा ।

(A) रमणीय + आ

(B) रमण + ईया

(C) रमणीय + टाप्

(D) रमणी + या

**8.** वाच्यानुसारम् उचितपदै: रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुन: लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) पुत्र: – जनक ! अहं जन्तुशालां द्रष्टुम् __________ ।

(A) इच्छति

(B) इच्छसि

(C) इच्छामि

(D) इच्छत:

(ii) जनक: – पुत्र ! अद्य अस्माभि: अवश्यं __________ गम्यते ।

(A) जन्तुशाला

(B) जन्तुशालायां

(C) जन्तुशालां

(D) जन्तुशालाया:

(iii) पुत्र: – के वेगेन धावन्ति ?

जनक: – __________ वेगेन धाव्यते ।

(A) मृगा:

(B) मृगै:

(C) मृगाभि:

(D) मृग:

(iv) पुत्र: – शशकौ किं खादत: ?

जनक: – __________ गृञ्जनं भक्षयत: ।

(A) स:

(B) ता:

(C) ते

(D) तौ

9. अहं प्रभाकर: । अध: मम दिनचर्या दत्ता । अङ्कानां स्थाने संस्कृतपदै: समयं लिखत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) अहं प्रात: (4:00) वादने उत्तिष्ठामि ।

(ii) (7:15) वादने विद्यालयं गच्छामि ।

(iii) (2:30) वादने विद्यालयात् आगच्छामि ।

(iv) (6:45) वादने सायं ईशवन्दनां करोमि ।

(v) (10:00) वादने रात्रौ शयनं करोमि ।

10. मञ्जूषायां प्रदत्तै: उचितै: अव्ययपदै: अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) यदा माता वदति __________ पुत्री गच्छति ।

(ii) अहं __________ विदेशं गमिष्यामि ।

(iii) तव पिता दिल्लीत: __________ आगमिष्यति ?

(iv) __________ निजकृत्यस्य फलं भुङ्क्ष्व ।

**मञ्जूषा**

| |
|---|
| श्व:, इदानीम्, तदा, कदा। |

11. अधोलिखितवाक्येषु रेखाङ्कित-अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुन: लिखत – (केवलं प्रश्नत्रयम्) *3×1=3*

(i) <u>ते</u> पत्रं लिखथ ।

(A) स:

(B) अहम्

(C) त्वम्

(D) यूयम्

(ii) मम तु पञ्च <u>मित्रा:</u> सन्ति ।

(A) मित्रम्

(B) मित्राणि

(C) मित्राभि:

(D) मित्र:

(iii) ते बालिका: नृत्यत: ।

(A) बालिका

(B) बालिके

(C) बालिकाभि:

(D) बालिकानाम्

(iv) ह्य: मम विद्यालये धावनप्रतियोगिता अस्ति ।

(A) आसीत्

(B) भविष्यति

(C) स्यात्

(D) अस्तु

## खण्ड: 'घ'

### पठितावबोधनम् *30 अङ्का:*

**12.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

वनस्य दृश्यं । समीपे एवैका नदी वहति । एक: सिंह: सुखेन विश्राम्यति, तदैव एक: वानर: आगत्य तस्य पुच्छं धुनोति । क्रुद्ध: सिंह: तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ: । तदैव अन्यस्मात् वृक्षात् अपर: वानर: सिंहस्य कर्णमाकृष्य पुन: वृक्षोपरि आरोहति । एवमेव वानरा: वारं वारं सिंहं तुदन्ति । क्रुद्ध: सिंह: इतस्तत: धावति, गर्जति परं किमपि कर्तुमसमर्थ: एव तिष्ठति । वानरा: हसन्ति वृक्षोपरि च विविधा: पक्षिण: अपि च सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति । निद्राभङ्गदु:खेन वनराज: सन्नपि तुच्छजीवै: आत्मन: एतादृश्या दुरवस्थया श्रान्त: सर्वजन्तून् दृष्ट्वा पृच्छति ।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) कीदृश: सिंह: इतस्तत: धावति ?

(ख) सिंह: कथं विश्राम्यति ?

(ग) समीपे का वहति ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) पक्षिण: सिंहस्य दशां दृष्ट्वा किं कुर्वन्ति ?

(ख) के वारं वारं सिंहं तुदन्ति ?

(ग) अपर: वानर: किं कृत्वा वृक्षमारोहति ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'हर्षमिश्रितं कलरवम्' अनयो: पदयो: विशेष्यपदं किम् ?

(ख) 'खगा:' इत्यर्थे गद्यांशे किं पदं प्रयुक्तम् ?

(ग) 'वहति' क्रियाया: कर्तृपदं चित्वा लिखत।

**13.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत – 5

आचार: प्रथमो धर्म: इत्येतद् विदुषां वच: ।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत: ।।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) तस्मात् कं रक्षेत् ?

(ख) प्रथम: धर्म: क: ?

(ग) केभ्य: अपि विशेषत: सदाचारं रक्षेत् ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) विदुषां वच: किम् ?

(ख) सदाचारं कथं रक्षेत् ?

(ग) 'आचार: प्रथमो धर्म:' इति केषां वच: ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'शिष्टाचारम्' इत्यस्य पर्याय: क: ?

(ख) श्लोकात् क्रियापदं चित्वा लिखत।

(ग) 'प्रथमो धर्म:' अनयो: विशेषणपदं किम् ?

**14.** अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत – *5*

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्त: शृगाल: हसन्नाह – "भवान् कुत: भयात् पलायित: ?"

*व्याघ्र:* – गच्छ, गच्छ जम्बुक ! त्वमपि कञ्चिद् गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्ध: परं गृहीतकरजीवितो नष्ट: शीघ्रं तदग्रत: ।

*शृगाल:* – व्याघ्र ! त्वया महत्कौतुकम् आवेदितम् यन्मानुषादपि विभेषि ?

*व्याघ्र:* – प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

*जम्बुक:* – स्वामिन् ! यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र ! तव पुन: तत्र गतस्य सा सम्मुखमपि ईक्षते यदि, तर्हि त्वया अहं हन्तव्य: इति ।

*व्याघ्र:* – शृगाल ! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।

*जम्बुक:* – यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् । स व्याघ्र: तथा कृत्वा काननं ययौ ।

(i) एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(क) 'पुत्रौ चपेटया प्रहरन्ती मया दृष्टा' इति क: वदति ?

(ख) व्याघ्र: शृगालं कुत्र गन्तुं कथयति ?

(ग) व्याघ्र: तथा कृत्वा कुत्र अगच्छत् ?

(ii) पूर्णवाक्येन उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) भयाकुलं व्याघ्रं दृष्ट्वा शृगाल: हसन् किम् अवदत् ?

(ख) का शास्त्रे श्रूयते ?

(ग) शृगाल: स्वामिनं कुत्र गन्तुं कथयति ?

(iii) निर्देशानुसारम् उत्तरत – (केवलं प्रश्नद्वयम्) $2\times1=2$

(क) 'मुक्त्वा' इत्यस्य विपरीतार्थकं पदं किम् ?

(ख) 'धूर्त: शृगाल:' अत्र विशेष्यपदं किम् ?

(ग) 'गच्छ त्वमपि किञ्चिद् गूढप्रदेशम्' अत्र 'गच्छ' क्रियाया: कर्तृपदं किम् ?

**15.** अधोलिखित-रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) *4×1=4*

(i) माम् अस्मात् नगराद् दूरं नय।

(ii) इन्द्रेण पृष्टा सुरभि: प्रत्यवदत्।

(iii) क्रुद्ध: सिंह: तम् प्रहर्तुमिच्छति।

(iv) तं शवम् एकस्मिन् चत्वरे स्थापितवन्तौ।

(v) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।

**16.** मञ्जूषाया: सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयित्वा पुन: लिखत – *4×1=4*

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्य: पुरुष: नास्ति योजकस्तत्र दुर्लभ:॥

**अन्वय:** –

अमन्त्रम् अक्षरं न (i) __________, अनौषधं (ii) __________ नास्ति, (iii) _________ पुरुष: नास्ति, तत्र योजक: (iv) _________ (अस्ति)।

**मञ्जूषा**

| |
|---|
| अयोग्य:, अस्ति, मूलम्, दुर्लभ:। |

**अथवा**

अधोलिखितश्लोकस्य भावार्थे रिक्तस्थानानि मञ्जूषाया: साहाय्येन पूरयित्वा पुन: लिखत – *4×1=4*

क्रोधो हि शत्रु: प्रथमो नराणाम्,
देहस्थितो देहविनाशनाय।
यथास्थित: काष्ठगतो हि वह्नि:,
स एव वह्निर्दहते शरीरम्॥

**भावार्थ:** –

मानवानां शरीरेषु स्थित: (i) __________ एव तेषां (ii) __________ विनाशाय प्रथम: शत्रु: अस्ति। यथा काष्ठेषु स्थित: (iii) ____________ तमेव ज्वालयति तथैव क्रोधरूपो अग्नि: अपि मानवानां (iv) ___________ दहति।

**मञ्जूषा**

| |
|---|
| शरीरस्य, अग्नि:, शरीराणि, क्रोध:। |

**17.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुन: लिखत – $8\times\frac{1}{2}=4$

(i) पुत्रस्य रुग्णतामाकर्ण्य स: व्याकुल: सञ्जात:।

(ii) कश्चन निर्धन: जन: वित्तमुपार्जितवान्।

(iii) पुत्र: तत्र निवसन् अध्ययने संलग्न: समभूत्।

(iv) तत्तनय: छात्रावासे वसति स्म।

(v) तेन वित्तेन तत्पुत्रं महाविद्यालये प्रवेशं दापयितुं सफलो जात:।

(vi) स: बसयानं विहाय पदातिरेव प्राचलत्।

(vii) एकदा तस्य पुत्र: रुग्ण: अभवत्।

(viii) पिता पुत्रं द्रष्टुं प्रस्थित:।

**18.** अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत – (केवलं प्रश्नत्रयम्) $3\times1=3$

(i) <u>अनृतं</u> वदसि चेत् काक: दशेत्।

(A) असत्यम् (B) स्पष्टम्

(C) ऋतम् (D) सत्यम्

(ii) विनिपातो न व: कश्चिद् दृश्यते <u>त्रिदशाधिप</u> !

(A) पुत्र: (B) गणेश:

(C) वरुण: (D) इन्द्र:

(iii) उदये <u>सविता</u> रक्तो रक्तश्चास्तमये तथा।

(A) चन्द्र: (B) सूर्य:

(C) शुक्र: (D) भौम:

(iv) उलूकं <u>नृपतिं</u> कृत्वा का नु सिद्धि: भविष्यति।

(A) सचिवम् (B) पक्षिणम्

(C) भूपतिम् (D) मन्त्रिणम्